# ॥ रामाष्टकम् ॥

कृतार्तदेववन्दनं दिनेशवम्शनन्दनम्।
सुशोभिभालचन्दनं नमामि राममीश्वरम्॥ १ ॥

मुनीन्द्रयज्ञकारकं शिलाविपत्तिहारकम्।
महाधनुर्विदारकं नमामि राममीश्वरम्॥ २ ॥

स्वतातवाक्यकारिणं तपोवने विहारिणम्।
करे सुचापधारिणं नमामि राममीश्वरम्॥ ३ ॥

कुरङ्गमुक्तसायकं जटायुमोक्षदायकम्।
प्रविद्धकीशनायकं नमामि राममीश्वरम्॥ ४ ॥

प्लवङ्गसङ्गसम्मतिं निबद्धनिम्रगापतिम्।
दशास्यवम्शसम्क्षतिं नमामि राममीश्वरम्॥ ५ ॥

विदीनदेवहर्षणं कपीप्सितार्थवर्षणम्।
स्वबन्धुशोककर्षणं नमामि राममीश्वरम्॥ ६ ॥

गतातिराज्यरक्षणं प्रजाजनार्तिभक्षणम्।
कृतास्तमोहलक्षणं नमामि राममीश्वरम्॥ ७ ॥

हृताखिलाचलाभरं स्वधामनीतनागरम्।
जगत्तमोदिवाकरं नमामि राममीश्वरम्॥ ८ ॥

इदं समाहितात्मना नरो रघूत्तमाष्टकम्।
पठन्नितन्तरं भयं भवोद्भवं न विन्दते॥